श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री रामानुजाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुजमहादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री रामानुजाष्टकम् ॥

रामानुजाय मुनये नम उक्तिमात्रम्
कामातुरोऽपि कुमतिः कलयन्नभीक्ष्णम्।
यामामनन्ति यमिनां भगवज्जनानाम्
तामेव विन्दति गतिं तमसः परस्तात्॥ १ ॥

सोमावचूड सुरशेखर दुष्करेण
कामातिगोपि तपसा क्षपयन्नघानि।
रामानुजाय मुनये नम इत्यनुक्त्वा
कोवा महीसहचरे कुरुतेनुरागम्॥ २ ॥

रामानुजाय नम इत्यसकृद्गृणीते
योमान मत्सर मदस्मर दूषितोऽपि।
प्रेमातुरः प्रियतमामपहाय पद्माम्
भूमाभुजाङ्ग शयनस्तमनुप्रयाति॥ ३ ॥

वामाळकानयन वागुरिकागृहीतम्
क्षेमाय किञ्चिदपि कर्तुमनीहमानम्।
रामानुजो यतिपतिर्यदिनेक्षते माम्
मामामकोऽयमिति मुञ्चति माधवोपि॥ ४ ॥

रामानुजेति यदिदं विदितं जगत्याम्
नामापि नश्रुति समीपमुपैति येषाम्।
मामामदीय इति सद्भिरुपेक्षितास्ते
कामानुविद्धमनसो निपतन्त्यधोधः॥ ५ ॥

नामासुकीर्त्य नरकार्तिहरं यदीयम्
व्योमाधिरोहति पदं सकलोपि लोकः।

रामानुजो यतिपतिर्यदि नाविरासीत्
कोमादृशः प्रभविता भवमुत्तरीयम्॥ ६ ॥

सीमा महीध्रपरिधिं पृथिवीमवाप्तुम्
वैमानिकेश्वर पुरीमधिवासितुम् वा।
व्योमाधिरोढुमपि न स्पृहयन्ति नित्यम्
रामानुजाङ्घ्रियुगळं शरणं प्रपन्नाः॥ ७ ॥

मामाधुनोति मनसोऽपि नगोचरं यत्
भूमा सखेन पुरुषेण सहानुभूय।
प्रेमानुविद्ध हृदय प्रियभक्तलभ्ये
रामानुजाङ्घ्रि कमले रमतां मनोमे॥ ८ ॥

श्लोकाष्टकमिदं पुण्यं यो भक्त्या प्रत्यहम् पठेत्।
आकारत्रय सम्पन्नः शोकाब्धिं तरति द्रुतम्॥ ९ ॥

॥ इति श्री रामानुजाष्टकं सम्पूर्णम्॥